दिनाङ्कः- 16.05.2024
प्रातः- 06:55

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

## लोकसभानिर्वाचन

लोकसभानिर्वाचन-प्रचाराभियानान्तर्गतं समेषामदपि दलानां शीर्षनेतारः पञ्चम-षष्ठ-सप्तमचरणाय च स्वीय-नैर्वाचनिक-प्रचाराभियाने पूर्णरूपेण संलग्नाः दरीदृष्टाः। प्रधानमन्त्री वरिष्ठोभाजपादलस्य नेता च श्री नरेन्द्रमोदी गतदिने महाराष्ट्रस्य नासिकक्षेत्रे डिंडोरी-उपक्षेत्रे एकां नैर्वाचनिक-जनसभां सम्बोधितवान्। तत्र श्री मोदी प्रोक्तवान् यत् कोविड-महामारी-समये देशेन यादृशी प्रतिक्रिया प्रदत्ता, तस्याः अखिलेऽपि विश्वे प्रशंसाभूत्। प्रधानमन्त्री कल्याणक्षेत्रे एकां मार्गीययात्रामपि विहितवान्। तत्र श्री मोदी समुदीरितावन् यत् तेन एतादृशः विकसितभारतदेशः प्रकल्पितः, यत्र सम्पूर्ण-विकसितता एव सन्निहिता। केन्द्रीयगृहमन्त्री भाजपादलीयः वरिष्ठः नेता अमितशाहः सबलं प्रत्यपादयत् यत् भारतीय-जनतापार्टीतिदलं पाकाधिकृत-जम्मूकश्मीरस्य प्रत्यावर्तनाय प्रतिबद्धं वर्तते।

पश्चिमबंगालस्य हुगलीस्थले एकां जनसभां सम्बोधयन् श्रीशाहः अकथयत् यत् पाकाधिकृतस्य जनाः पाकिस्तानदेशात् स्वतन्त्राय प्रदर्शनानि अभ्यर्थनानि च कुर्वन्तः सन्ति। जम्मूकश्मीरस्य पर्यटन-क्रियाकलाप-संवर्धन-विषयेऽपि गृहमन्त्री कथितवान् यत् द्विकोटिः पर्यटकाः जम्मूकश्मीरं प्रत्यागताः। येन कीर्तिमानमपि निर्मितम्। सप्तत्यधिकत्रिशतम् अनुच्छेदस्य निरसन-प्रकरणे श्रीशाहः अवोचत् यत् ममतादीदी- कांग्रेस-इत्यादीनि उक्तवन्तः आसन् यत् अयम् अनुच्छेदः यथावदेव स्थापनीयः। ओडिशायां सर्वाणि त्रीणि प्रमुखाणि राजनीतिकदलानि कांग्रेस-भाजपा-बीजद-दलानि च लोकसभा अथ विधानसभा- निर्वाचनाय प्रचाराभियाने संलग्नानि। वरिष्ठो कांग्रेसदलस्य नेता राहुलःगान्धिः बलांगीर क्षेत्रे निर्वाचन-जनसभां सम्बोधितवान्।

## नागरिकता संशोधन अधिनियम

नागरिकता-अधिसूचना-क्रमे नागरिकता-प्रमाणपत्राणां प्रथमांशः नागरिकता-संशोधन-नियमाः विंशतिः चतुर्विंशतिः गतदिने निस्सारिताः। केन्द्रीयः गृहसचिवः अजयकुमारः भल्ला नवदेहल्यां चर्तुदशसंख्याकेभ्यः आवेदकेभ्यः नागरिकता-प्रमाणपत्राणि प्रदत्तवान्। गृहमन्त्रालयानुसारेण नैकेभ्यः अन्येभ्यः आवेदकभ्यः ईमेल-संकेतमाध्यमेन आंकिकीय-हस्ताक्षरित-प्रमाणपत्राणि निस्सारितानि। गृहसचिवः सर्वेभ्यः आवेदनेभ्यः वर्धापनानि दत्तवान्।

## भारतीयऋतुविज्ञानविभागः

भारतीयऋतुविज्ञानविभागेन अस्य मासस्य अष्टादश दिनाङ्कपर्यन्तं राजस्थान, उत्तरप्रदेश, पञ्जाब, हरियाणा राज्यानि समेत्य श्वः आरभ्य उत्तरपश्चिमभारतस्य उपरि अधिक-तापस्य पूर्वानुमानं कृतम् अस्ति। अनेनोक्तम् यत् अद्य तटीयमहाराष्ट्रे, गोवायां, श्वः च गुजरात राज्ये उष्ण-आर्द्र-वायुः प्रचलिष्यति। अद्य महाराष्ट्र, मध्यप्रदेश, छत्तीसगढ, ओडिशा, गुजरातप्रदेशेषु च वज्रपातेन, विद्युत्दध्वनिना, तीव्रवायुना च सहैव लघुतः मध्यमवृष्टिः अपि भविष्यति इति ऋतुविभागेन पूर्वानुमानं कृतम् अस्ति।

## आई.पी.एल.

आई.पी.एल इत्येतस्यां क्रिकेट्-प्रतिस्पर्धायां गतदिने समायोजिते द्वन्द्वे पंजाब किंग्स इत्येतेन दलेन राजस्थान रॉयल्स इति दलं पञ्चस्तोभपुरस्सरं पराजितम्। गुवाहाट्यां क्रीडिते एतस्मिन् द्वन्द्वे प्रथमं दण्डेन क्रीडयता राजस्थान रॉयल्स इति दलेन चतुश्चत्वारिंशदुत्तर- एकशतं धावनांका: समर्जिता:, प्रत्युत्तरे पंजाब किंग्स इति दलेन सहजतया एव धावनाकान् समर्ज्य लक्ष्यं समधिगतम्। प्रतिस्पर्धायामद्य सनराईजर्स हैदराबाद-गुजरात टाइटंस-इत्यनयो: दलयो: मध्ये स्पर्धा हैदराबादस्थे राजीव-गान्धि-अन्ताराष्ट्रिय-क्रीडांगणे समायोजयिष्यते।